# ईशावास्योपनिषद्

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ ईशा वास्यमिदगं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥ 1 ॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतगं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ 2 ॥

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तागंस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ 3 ॥

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ 4 ॥

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ 5 ॥

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विहुगुप्सते ॥ 6 ॥

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ 7 ॥

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरगं शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्
व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ 8 ॥

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायागं रताः ॥ 9 ॥

अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया ।

इति॑ शुशु॒म धीरा॑णां॒ ये न॒स्तद्वि॑चचक्षि॒रे ॥ 10 ॥

वि॒द्यां चावि॑द्यां च॒ यस्तद्वेदो॒भय॑ग्ं स॒ह ।
अवि॑द्यया मृ॒त्युं ती॒र्त्वा वि॒द्यया॒ऽमृत॑मश्नु॒ते ॥ 11 ॥

अ॒न्धं तमः॒ प्रवि॑शन्ति॒ ये॑ऽसम्भूतिमु॒पास॑ते ।
ततो॒ भूय॑ इव॒ ते तमो॒ य उ॒ सम्भूत्याग्ं र॒ताः ॥ 12 ॥

अ॒न्यदे॒वाहुः सम्भ॒वाद॒न्यदा॑हु॒रसम्भवात् ।
इति॑ शुश्रु॒म धीरा॑णां॒ ये न॒स्तद्वि॑चचक्षि॒रे ॥ 13 ॥

सम्भूतिं च विना॒शं च॒ यस्तद्वेदो॒भय॑ग्ं स॒ह ।
वि॒ना॒शेन॑ मृ॒त्युं ती॒र्त्वा सम्भूत्या॒ऽमृत॑मश्नु॒ते ॥ 14 ॥

हि॒र॒ण्मये॑न॒ पात्रे॑ण स॒त्यस्यापि॑हितं॒ मु॒खम् ।
तत्वं पू॑ष॒न्नपावृ॑णु स॒त्यध॑र्माय दृ॒ष्टये ॥ 15 ॥

पूष॑न्नेकर्षे यम सू॒र्य॒ प्राजा॑पत्य॒ व्यूह र॒श्मीन्
समू॑ह॒ तेजो॒ यत्ते रू॒पं कल्या॑णतमं॒ तत्ते पश्यामि ।
यो॒ऽसाव॒सौ पुरु॑षः॒ सो॒ऽहम॑स्मि ॥ 16 ॥

वा॒युरनि॑लम॒मृत॒मथेदं भस्मा॑न्त॒ग्ं शरी॑रम् ।
ॐ 3 क्रतो॒ स्मर॑ कृ॒तग्ं स्मर॒ क्रतो॒ स्मर॑ कृ॒तग्ं स्मर॑ ॥ 17 ॥

अग्ने॒ नय॑ सु॒पथा॑ रा॒ये अ॒स्मान् विश्वा॑नि देव व॒युना॑नि वि॒द्वान् ।
यु॒यो॒ध्य॒स्मज्जु॑हु॒रा॒णमेनो॒ भूयि॑ष्टां ते॒ नम॑उक्तिं विधेम ॥ 18 ॥

ॐ पू॒र्णमदः॒ पू॒र्णमिदं॒ पू॒र्णात्पू॒र्णमु॒दच्यते ।
पू॒र्णस्य पू॒र्णमादा॒य पू॒र्णमेवावशि॒ष्यते ॥

ॐ शा॒न्तिः शा॒न्तिः शा॒न्तिः ॥

Web Url: http://www.vignanam.org/veda/eesavasyopanishad-devanagari.html